# Pitambara Upanishad

# પીતામ્બરોપનિષત્

## Document Information

Text title : pItAmbaropaniShat

File name : pItAmbaropaniShat.itx

Category : upanishhat, devii, devI, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# પીતામ્બરોપનિષત્

ॐઅથ હૈનાં બ્રહ્મરન્ધ્રે સુભગાં બ્રહ્માસ્ત્રત્વરૂપિણીમાપ્નોતિ ।
બ્રહ્માસ્ત્રાં મહાવિદ્યાં શામ્ભવીં સર્વસ્તમ્ભકરીં સિદ્ધાં ચતુર્ભુજાં
દક્ષાભ્યાં કરાભ્યાં મુદ્ગરપાશૈ વામાભ્યાં શત્રુજિહ્વાવજ્રે દધાનાં
પતિવાસસં પીતાલઙ્કારસમ્પન્ના દૃઢીભૂતપીનોન્નતપયોધરયુગ્માઢ્યાં
તપ્તકાર્તસ્વરકુણ્ડલદ્વયવિરાજિતમુખામ્ભોજાં
લલાટપટ્ટોલ્લસત્પીતચન્દ્રાર્ધમનુબિભ્રતીમુદ્યદ્દિવાકરોદ્યોતાં
સ્વર્ણસિંહાસનમધ્યકમલસંસ્થાં ધિયા સઞ્ચિન્ત્ય તદુપરિ
ત્રિકોણષટ્કોણવસુપત્રવૃત્તાન્તઃ ષોડશદલકમલોપરિ
ભૂબિમ્બત્રયમનુસન્ધાય તત્રાદ્યયોન્યન્તરે દેવીમાહૂય ધ્યાયેત્ । યોનિં
જગદ્યોનિં સમાયમુચ્ચાર્ય શિવાતે ભૂમાગ્રબિન્દુમિન્દુખણ્ડમગ્નિબીજં તતો
વરુણાઙ્કગુણાર્ણમત્રિયુતં સ્થિરામુખિ ઇતિ સમ્બોધ્ય સર્વદુષ્ટાનામિદં
ચાભાષ્ય વાચમિતિ મુખમિતિ પદમિતિ સ્તમ્ભયેતિ વોચ્ચાર્ય જિહ્વાં
વૈશારદી કીલયેતિ બુદ્ધિં વિનાશયેતિ પ્રોચ્ચાર્ય ભૂમાયાં વેદાદ્યં
તતો યજ્ઞભૂગુહાયાં યોજયેત્ । સ મહાસ્તમ્ભેશ્વરઃ સર્વેશ્વરઃ ।
સ મેનાસ્તમ્ભં કરોતિ । કિં બહુના વિવસ્વદ્ધૃતિસ્તમ્ભકર્તા
સર્વવાતસ્તમ્ભકર્તેતિ । કિં દિવાકર્ષયતિ । સ સર્વવિદ્યેશ્વરઃ
સર્વમન્ત્રેશ્વરો ભૂત્વા પૂજાયા આવર્તનં ત્રૈલોક્યસ્તમ્ભિન્યાઃ કુર્યાત્ ।
અઙ્ગમાદ્યં દ્વારતો ગણેશં વટુકં યોગિનીં ક્ષેત્રાધીશં ચ
પૂર્વાદિકમભ્યર્ચ્ય ગુરુપઙ્ક્તિમીશાસુરાન્તમન્તઃ પ્રાચ્યાદૌ ક્રમાનુગતા
બગલા સ્તમ્ભિની જૃમ્ભિણી મોહિની વશ્યા અચલા ચલા દુર્ધરા અકલ્મષા
આધારા કલ્પના કાલકર્ષિણી ભ્રમરિકા મદગમના ભોગા યોગિકા એતા
હ્યષ્ટદલાનુગતાઃ પૂજ્યાઃ । બ્રાહ્મી માહેશ્વરી કૌમારી વૈષ્ણવી વારાહી
નારસિંહી ચામુણ્ડા મહાલક્ષ્મીશ્ચ । ષડ્યોનિગર્ભાન્તા ડાકિની રાકિની
લાકિની કાકિની શાકિની હાકિની વેદ્યાદ્યમ્થિરમાયાદ્યાઃ સમભ્યર્ચ્ય
શક્રાગ્નિયમનિરૃતિવરુણવાયવ્યધનદેશાનપ્રજાપતિનાગેશાઃ

પરિવારાભિમતાઃ સ્થિરાદિવેદાદ્યાઃ સવાહનાઃ સદસ્ત્રકા બાહ્યતોઽભ્યર્ચ્ય
તાં યોનિં રતિપ્રીતિમનોભવા એતાઃ સર્વાઃ સમાઃ પીતાંશુકા ધ્યેયાઃ ।
તદન્તમૂલાયાં બલાદિષોઽશાનુગતાઃ પૂજ્યાઃ નીરાજનૈઃ । સ હૈશ્વર્યયુક્તો
ભવતિ । ય એનાં ધ્યાયતિ સ વાગ્મી ભવતિ । સોઽમૃતત્વમશ્નુતે ।
સર્વસિદ્ધિકર્તા ભવતિ । સૃષ્ટિસ્થિતિસંહારકર્તા ભવતિ ।
સ સર્વેશ્વરો ભવતિ । સ તુ ઋદ્ધીશ્વરો ભવતિ । સ શાક્તઃ સ
વૈષ્ણવઃ સ ગણપઃ સ શૈવઃ । સ જીવન્મુક્તો ભવતિ । સ સંન્યાસઈ
ભવતિ । ન્યસનં ન્યાસઃ । સમ્યઙ્ન્યાસઃ સન્ન્યાસઃ । ન તુ મુણ્ડિતમુણ્ડઃ ।
ષટ્ત્રિંશદસ્ત્રેશ્વરો ભવેત્ સૌભાગ્યાર્ચનેનેતિ પ્રોતં વેદ ।
ૐ શિવમ્ ॥

(શાક્ત-ઉપનિષદઃ)

ઇતિ પીતામ્બરોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

---

*Pitambara Upanishad*

pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*